श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ब्रह्मश्री गणपतीशास्त्री विरचितं

# ॥ श्रीवातपुरनाथाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवातपुरनाथाष्टकम् ॥

कुन्दसुमवृन्दसममन्दहसितास्यं
नन्दकुलनन्दभरतुन्दलनकन्दम्।
पूतनिजगीतलवधूतदुरितं तं
वातपुरनाथमिममातनु हृदब्जे॥ १॥

नीलतरजालधरभालहरिरम्यं
लोलतरशीलयुतबालजनलीलम्।
जालनतिशीलमपि पालयितुकामं
वातपुरनाथमिममातनु हृदब्जे॥ २॥

कंसरणहिंसमिह संसरणजात-
क्लान्तिभरशान्तिकरकान्तिझरवीतम्।
वातमुखधातुजनिपातभयघातं
वातपुरनाथमिममातनु हृदब्जे॥ ३॥

जातुधुरिपातुकमिहातुरजनं द्राक्
शोकभरमूकमपि तोकमिव पान्तम्।
भृङ्गरुचिसङ्गरकृदङ्गलतिकं तं
वातपुरनाथमिममातनु हृदब्जे॥ ४॥

पापभवतापभरकोपशमनार्था-
श्वासकरभासमृदुहासरुचिरास्यम्।
रोगचयभोगभयवेगहरमेकं
वातपुरनाथमिममातनु हृदब्जे॥ ५॥

घोषकुलदोषहरवेषमुपयान्तं
पूषशतदूषकविभूषणगणाढ्यम्।

www.prapatti.com

भुक्तिमपिमुक्तिमतिभक्तिषु ददानं
वातपुरनाथमिममातनु हृदब्जे॥ ६ ॥

पापकदुरापमतितापहरशोभ-
स्वापघनमामतदुमापतिसमेतम्।
दूनतरदीनसुखदानकृतदीक्षं
वातपुरनाथमिममातनु हृदब्जे॥ ७ ॥

पादपतदादरणमोदपरिपूर्णं
जीवमुखदेवजनसेवनफलाङ्घ्रिम्।
रूक्षभवमोक्षकृतदीक्षनिजवीक्षं
वातपुरनाथमिममातनु हृदब्जे॥ ८ ॥

भृत्यगणपत्युदितनुत्युचितमोदं
स्पष्टमिदमष्टकमदुष्टकरणार्हम्।
आदधतमादरदमादिलयशून्यं
वातपुरनाथमिममातनु हृदब्जे॥ ९ ॥

॥ इति श्रीवातपुरनाथाष्टकं संपूर्णम् ॥

www.prapatti.com